यद्यप्येते न पश्यन्ति लोभोपहतचेतसः।
कुलक्षयकृतं दोषं मित्रद्रोहे च पातकम्।।१.३८

yadyapyete na paṣyanti lobhopahatacetasah ।
kulakśayakritam dośam mitradrohe ca pātakam।।1.38

कथं न ज्ञेयमस्माभिः पापादस्मान्निवर्तितुम्।
कुलक्षयकृतं दोषं प्रपश्यद्भिर्जनार्दन।।१.३९

katham na jneyamasmābhih pāpādasmānnivartitum ।
kulakśayakritam dośam prapaṣyadbhir-janārdana।।1.39

कुलक्षये प्रणश्यन्ति कुलधर्माः सनातनाः।
धर्मे नष्टे कुलं कृत्स्नं अधर्मोऽभिभवत्युत।।१.४०

kulakśaye praṇaṣyanti kuladharmāh sanātanāh ।
dharme naśṭe kulam kritsnamadharmobhibhavatyuta ।।1.40

अधर्माभिभवात्कृष्ण प्रदुष्यन्ति कुलस्त्रियः।
स्त्रीषु दुष्टासु वार्ष्णेय जायते वर्णसंकरः।।१.४१

adharmābhibhavātkriśṇa pradusyanti kulastriyah ।
strīśu duśṭāsu vārśṇeya jāyate varṇasankarah ।।1.41

संकरो नरकायैव कुलघ्नानां कुलस्य च।
पतन्ति पितरो ह्येषां लुप्तपिण्डोदकक्रियाः।।१.४२

sankaro narakāyaiva kulaghnānām kulasya ca ।
patanti pitaro hyeśām luptapiṇḍodakakriyāh ।।1.42